**'त्रैलोक्यविजय'** नामक परम अद्भुत कवच, विभूति योग से सम्भूत महान पुण्यमय 'स्तवराज' नामवाला स्तोत्र और सम्पूर्ण कामनाओं का फल प्रदान करने वाला, 'मन्त्रकल्पतरु' नामक मन्त्र प्रदान किया था। महादेव जी ने कहा– भृगुवंशी महाभाग वत्स! तुम प्रेम के कारण मुझे पुत्र से भी अधिक प्रिय हो, अतः आओ कवच ग्रहण करो। राम! जो ब्रह्माण्ड में परम अद्भुत तथा विजयप्रद है, श्रीकृष्ण के उस 'त्रैलोक्यविजय' नामक कवच का वर्णन करता हूँ, सुनो। पूर्वकाल में श्रीकृष्ण ने गोलोक में स्थित वृन्दावन नामक वन में राधिकाश्रम में रासमण्डल के मध्य यह कवच मुझे दिया था। यह अत्यन्त गोपनीय तत्त्व, सम्पूर्ण मन्त्रसमुदाय का विग्रहस्वरूप, पुण्य से भी बढ़कर पुण्यतर परमोत्कृष्ट है और इसे स्नेहवश मैं तुम्हें बता रहा हूँ। जिसे पढ़कर एवं धारण करके मूलप्रकृति भगवती आद्याशक्ति ने शुम्भ, निशुम्भ, महिषासुर और रक्तबीज का वध किया था। जिसे धारण करके मैं लोकों का संहारक और सम्पूर्ण तत्त्वों का जानकार हुआ हूँ तथा पूर्वकाल में जो दुरन्त और अवध्य थे, उन त्रिपुरों को खेल–ही–खेल में दग्ध कर सका हूँ। जिसे पढ़कर और धारण करके ब्रह्मा ने इस उत्तम सृष्टि की रचना की है। जिसे धारण करके भगवान शेष सारे विश्व को धारण करते हैं। जिसे धारण करके कूर्मराज शेष को लीलापूर्वक धारण किये रहते हैं। जिसे धारण करके स्वयं सर्वव्यापक भगवान वायु विश्व के आधार हैं। जिसे धारण करके वरुण सिद्ध और कुबेर धन के स्वामी हुए हैं। जिसे पढ़कर एवं धारण करके स्वयं इन्द्र देवताओं के राजा बने हैं। जिसे धारण करके तेजोराशि स्वयं सूर्य भुवन में प्रकाशित होते हैं। जिसे पढ़कर एवं धारण करके चन्द्रमा महान बल और पराक्रम से सम्पन्न हुए हैं। जिसे पढ़कर एवं धारण करके महर्षि अगस्त्य सातों समुद्रों को पी गये और उसके तेज से वातापि नामक दैत्य को पचा गये।

जिसे पढ़कर एवं धारण करके पृथ्वी देवी सबको धारण करने में समर्थ हुई हैं। जिसे पढ़कर एवं धारण करके गंगा स्वयं पवित्र होकर भुवनों को पावन करने वाली बनी हैं। जिसे धारण करके धर्मात्माओं में श्रेष्ठ धर्म लोकों के साक्षी बने हैं। जिसे धारण करके सरस्वती देवी सम्पूर्ण विद्याओं की अधिष्ठात्री देवी हुई हैं। जिसे धारण करके परात्परा लक्ष्मी लोकों को अन्न प्रदान करने वाली हुई हैं। जिसे पढ़कर एवं धारण करके सावित्री ने वेदों को जन्म दिया है। भृगुनन्दन! जिसे पढ़ एवं धारणकर वेद धर्म के वक्ता हुए हैं। जिसे पढ़कर एवं धारण करके अग्नि शुद्ध एवं तेजस्वी हुए हैं और जिसे धारण करके भगवान् सनत्कुमार को ज्ञानियों में सर्वश्रेष्ठ स्थान मिला है। जो महात्मा, साधु एवं श्रीकृष्ण भक्त हो, उसी को यह कवच देना चाहिये, क्योंकि शठ एवं दूसरे के शिष्य को देने से दाता मृत्यु को प्राप्त हो जाता है। इस त्रैलोक्यविजय कवच के प्रजापति ऋषि हैं। गायत्री छन्द है। स्वयं रासेश्वर देवता हैं और त्रैलोक्य की विजय प्राप्ति में इसका विनियोग कहा गया है। यह परात्पर कवच तीनों लोकों में दुर्लभ है। 'ॐ श्रीकृष्णाय नमः' सदा मेरे सिर की रक्षा करे। 'कृष्णाय स्वाहा' यह पञ्चाक्षर सदा कपाल को सुरक्षित रखे। 'कृष्ण' नेत्रों की तथा 'कृष्णाय स्वाहा' पुतलियों की रक्षा करे। 'हरये नमः' सदा मेरी भृकुटियों को बचावे। 'ॐ गोविन्दाय स्वाहा' मेरी नासिका की सदा रक्षा करे। 'गोपालाय नमः' मेरे गण्डस्थलों की सदा सब ओर से रक्षा करे। 'ॐ गोपाङ्गनेशाय नमः' सदा मेरे कानों की रक्षा करे। 'ॐ कृष्णाय नमः' निरन्तर मेरे दोनों ओठों की रक्षा करे। 'ॐ गोविन्दाय स्वाहा' सदा मेरी दंतपंक्तियों की रक्षा करे। 'ॐ कृष्णाय नमः' दाँतों के छिद्रों की तथा 'क्लीं' दाँतों के ऊर्ध्वभाग की रक्षा करे। 'ॐ श्रीकृष्णाय स्वाहा' सदा मेरी जिह्वा की रक्षा करे। 'रासेश्वराय स्वाहा' सदा मेरे तालु की रक्षा करे।

'राधिकेशाय स्वाहा' सदा मेरे कण्ठ की रक्षा करे। 'गोपाङ्गनेशाय नमः' सदा मेरे वक्षःस्थल की रक्षा करे। 'ॐ गोपेशाय स्वाहा' सदा मेरे कंधों की रक्षा करे। 'नमः किशोरवेशाय स्वाहा' सदा पृष्ठभाग की रक्षा करे। 'मुकुन्दाय नमः' सदा मेरे उदर की तथा 'ॐ ह्रीं क्लीं कृष्णाय स्वाहा' सदा मेरे हाथ-पैरों की रक्षा करे। 'ॐ विष्णवे नमः' सदा मेरी दोनों भुजाओं की रक्षा करे। 'ॐ ह्रीं भगवते स्वाहा' सदा मेरे नखों की रक्षा करे। 'ॐ नमो नारायणाय' सदा नख-छिद्रों की रक्षा करे। 'ॐ ह्रीं ह्रीं पद्मनाभाय नमः' सदा मेरी नाभि की रक्षा करे। 'ॐ सर्वेशाय स्वाहा' सदा मेरे कंकाल की रक्षा करे। 'ॐ गोपीरमणाय स्वाहा' सदा मेरे नितम्ब की रक्षा करे। 'ॐ गोपीरमणनाथाय स्वाहा' सदा मेरे पैरों की रक्षा करे। 'ॐ ह्रीं श्रीं रसिकेशाय स्वाहा' सदा मेरे सर्वांगों की रक्षा करे। 'ॐ केशवाय स्वाहा' सदा मेरे केशों की रक्षा करे। 'नमः कृष्णाय स्वाहा' सदा मेरे ब्रह्मरन्ध्र की रक्षा करे। 'ॐ माधवाय स्वाहा' सदा मेरे रोमों की रक्षा करे। 'ॐ ह्रीं श्रीं रसिकेशाय स्वाहा' मेरे सर्वस्व की सदा रक्षा करे। परिपूर्णतम श्रीकृष्ण पूर्व दिशा में सर्वदा मेरी रक्षा करें। स्वयं गोलोकनाथ अग्निकोण में मेरी रक्षा करें। पूर्ण ब्रह्मस्वरूप दक्षिण दिशा में सदा मेरी रक्षा करें। श्रीकृष्ण नैर्ऋत्यकोण में मेरी रक्षा करें। श्रीहरि पश्चिम दिशा में मेरी रक्षा करें। गोविन्द वायव्यकोण में नित्य-निरन्तर मेरी रक्षा करें। रसिक शिरोमणि उत्तर दिशा में सदा मेरी रक्षा करें। वृन्दावन विहारकृत सदा ईशानकोण में मेरी रक्षा करें। वृन्दावनी के प्राणनाथ ऊर्ध्वभाग में मेरी रक्षा करें। महाबली बलिहारी माधव सदैव मेरी रक्षा करें। नृसिंह जल, स्थल तथा अन्तरिक्ष में सदा मुझे सुरक्षित रखें। माधव सोते समय तथा जाग्रत-काल में सदा मेरा पालन करें तथा जो सबके आन्तरात्मा, निर्लेप और सर्वव्यापक हैं, वे भगवान सब ओर से मेरी रक्षा करें। वत्स! इस प्रकार मैंने

'त्रैलोक्यविजय' नामक कवच, जो परम अनोखा तथा समस्त मन्त्रसमुदाय का मूर्तमान् स्वरूप है, तुम्हें बतला दिया। मैंने इसे श्रीकृष्ण के मुख से श्रवण किया था। इसे जिस-किसी को नहीं बतलाना चाहिये। जो विधिपूर्वक गुरु का पूजन करके इस कवच को गले में अथवा दाहिनी भुजा पर धारण करता है, वह भी विष्णुतुल्य हो जाता है, इसमें संशय नहीं है। वह भक्त जहाँ रहता है, वहाँ लक्ष्मी और सरस्वती निवास करती हैं। यदि उसे कवच सिद्ध हो जाता है तो वह जीवन्मुक्त हो जाता है और उसे करोड़ों वर्षों की पूजा का फल प्राप्त हो जाता है। हजारों राजसूय, सैकड़ो वाजपेय, दस हजार अश्वमेध, सम्पूर्ण महादान तथा पृथ्वी की प्रदक्षिणा- ये सभी इस त्रैलोक्यविजय की सोलहवीं कला की भी समानता नहीं कर सकते। व्रत-उपवास का नियम, स्वाध्याय, अध्ययन, तपस्या और समस्त तीर्थों में स्नान- ये सभी इसकी एक कला को भी नहीं पा सकते। यदि मनुष्य इस कवच को सिद्ध कर ले तो निश्चय ही उसे सिद्धि, अमरता और श्रीहरि की दासता आदि सब कुछ मिल जाता है। जो इसका दस लाख जप करता है, उसे यह कवच सिद्ध हो जाता है और जो सिद्ध कवच होता है, वह निश्चय ही सर्वज्ञ हो जाता है। परंतु जो इस कवच को जाने बिना श्रीकृष्ण का भजन करता है, उसकी बुद्धि अत्यन्त मन्द है, उसे करोड़ों कल्पों तक जप करने पर भी मन्त्र सिद्धिदायक नहीं होता। वत्स! इस कवच को धारण करके तुम आनन्दपूर्वक निःशंक होकर अनायास ही इक्कीस बार पृथ्वी को क्षत्रियों से शून्य कर डालो। बेटा! प्राणसंकट के समय राज्य दिया जा सकता है, सिर कटाया जा सकता है और प्राणों का परित्याग भी किया जा सकता है, परंतु ऐसे कवच का दान नहीं करना चाहिये ।

## ॥ श्रीपरशुरामकृतं श्रीभद्रकालीस्तोत्रम् ॥

ब्रह्मवैवर्तपुराण, गणपतिखण्ड में श्रीनारायण नारद से कहते हैं– परशुराम और कार्तवीर्य युद्ध के समय कार्तवीर्य के मित्र राजा सुचन्द्र परशुराम से युद्ध करने आये। सुचन्द्र का परशुराम के साथ भयानक युद्ध हुआ, पर वे परास्त न हो सके। तब परशुराम ने देखा कि मुण्डमाला धारण किये हुए विकटानना भयंकरी जगज्जननी श्रीभद्रकाली सुचन्द्र की रक्षा कर रही हैं। यह देखकर श्रीपरशुराम ने शस्त्र–अस्त्र का त्याग करके महामाया की स्तुति आरम्भ की। यथा–

**परशुराम उवाच**

**नमः शङ्करकान्तायै सारायै ते नमो नमः ।**
**नमो दुर्गतिनाशिन्यै मायायै ते नमो नमः ॥**

**नमो नमो जगद्धात्र्यै जगत्कर्त्र्यै नमो नमः ।**
**नमोऽस्तु ते जगन्मात्रे कारणायै नमो नमः ॥**

**प्रसीद जगतां मातः सृष्टिसंहारकारिणि ।**
**त्वत्पादे शरणं यामि प्रतिज्ञां सार्थिकां कुरु ॥**

**त्वयि मे विमुखायां च को मां रक्षितुमीश्वरः ।**
**त्वं प्रसन्ना भव शुभे मां भक्तं भक्तवत्सले ॥**

**युष्माभिः शिवलोके च मह्यं दत्तो वरः पुरा ।**
**तं वरं सफलं कर्तुं त्वमर्हसि वरानने ॥**

**जामदग्न्यस्तवं श्रुत्वा प्रसन्नाभवदम्बिका ।**
**मा भैरित्येवमुक्त्वा तु तत्रैवान्तरधीयत ॥**

**एतद् भृगुकृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ।**
**महाभयात् समुत्तीर्णः स भवेदवलीलया ॥**

**स पूजितश्च त्रैलोक्ये त्रैलोक्यविजयी भवेत् ।**
**ज्ञानिश्रेष्ठो भवेच्चैव वैरिपक्षविमर्दकः ॥**

**परशुराम बोले**- आप शंकर जी की प्रियतमा पत्नी है. आपको नमस्कार है। सारस्वरूपा आपको बारम्बार प्रणाम है। दुर्गतिनाशिनी को मेरा अभिवादन है। मायारूपा आपको मैं बारंबार सिर झुकाता हूँ। जगद्धात्री को नमस्कार-नमस्कार। जगत्कर्मी को पुनः पुनः प्रणाम। जगज्जननी को मेरा नमस्कार प्राप्त हो। कारणरूपा आपको बारंबार अभिवादन है। सृष्टि का संहार करने वाली जगन्माता! प्रसन्न होइये। मैं आपके चरणों की शरण ग्रहण करता हूँ, मेरी प्रतिज्ञा सफल कीजिये। मेरे प्रति आपके विमुख हो जाने पर कौन मेरी रक्षा कर सकता है? भक्तवत्सले। शुभे। आप मुझ भक्त पर कृपा कीजिये। सुमुखि। पहले शिवलोक में आप लोगों ने मुझे जो वरदान दिया था, उस वर को आपको सफल करना चाहिये।

परशुराम द्वारा किये गये इस स्तवन को सुनकर अम्बिका का मन प्रसन्न हो गया और भय मत करो यो कहकर वे वहीं अन्तर्धान हो गयीं। जो मनुष्य भक्तिपूर्वक इस परशुरामकृत स्तोत्र का पाठ करता है, वह अनायास ही महान भय से छूट जाता है। वह त्रिलोकी में पूजित, त्रैलोक्यविजयी, ज्ञानियों में श्रेष्ठ और शत्रुपक्ष का विमर्दन करने वाला हो जाता है।

**॥ इति श्रीपरशुरामकृतं श्रीभद्रकालीस्तोत्रं सम्पूर्णम् ॥**

## ॥ वंशवृद्धिकरं वंशकवचम् ॥

भगवन् ! देव देवेश कृपया त्वं जगत्प्रभो ।
वंशाख्यकवचं ब्रूहि मह्यं शिष्याय तेऽनघ ।
यस्य प्रभावाद् देवेश वंशवृद्धिर्हि जायते ॥१॥

सूर्य उवाच

शृणु पुत्र प्रवक्ष्यामि वंशाख्यं कवचं शुभम् ।
सन्तानवृद्धिर्यत् पाठाद् गर्भरक्षा सदा नृणाम् ॥२॥
वन्ध्याऽपि लभते पुत्रं काकवन्ध्या सुतैर्युता ।
मृतवत्सा सपुत्रा स्यात् स्रवद्-गर्भा स्थिरप्रजा ॥३॥
अपुत्रा पुष्पिणी यस्य धारणाच्च सुखप्रभुः।
कन्या प्रजा पुत्रिणी स्यादेतत् स्तोत्र-प्रभावतः ॥४॥
भूत-प्रेतादिजा बाधा या बाधा कुलदोषजा ।
ग्रहबाधा देवबाधा बाधा शत्रुकृता च या ॥५॥
भस्मी भवन्ति सर्वास्ताः कवचस्य प्रभावतः ।
सर्वे रोगा विनश्यन्ति सर्वे बालग्रहाश्च ये ॥६॥
पूर्वे रक्षतु वाराही चाग्नेय्यामम्बिका स्वयम् ।
दक्षिणे चण्डिका रक्षेन् नैऋत्यां शववाहिनी ॥७॥
वाराही पश्चिमे रक्षेद् वायव्यां च महेश्वरी ।
उत्तरे वैष्णवी रक्षेदीशान्ये सिंहवाहिनी ॥८॥
ऊर्ध्वं तु शारदा रक्षेदधो रक्षतु पार्वती।
शाकम्भरी शिरो रक्षेन् मुखं रक्षतु भैरवी ॥९॥
कण्ठं रक्षतु चामुण्डा हृदयं रक्षताच्छिवा ।

ईशानी च भुजौ रक्षेत् कुक्षिं नाभिं च कालिका ॥१०॥
अपर्णा ह्युदरं रक्षेत् कटिं वस्तिं शिवप्रिया।
ऊरू रक्षतु कौमारी जया जानुद्वयं तथा ॥११।
गुल्फौ पादौ सदा रक्षेद् ब्रह्माणी परमेश्वरी ।
सर्वाङ्गानि सदा रक्षेद् दुर्गा दुर्गार्ति-नाशिनी ॥१२॥
नमो देव्यै महादेव्यै दुर्गायै सततं नमः ।
पुत्रसौख्यं देहि देहि गर्भरक्षां कुरुष्व नः ॥१३॥

ॐ ह्रीं ह्रीं ह्रीं श्रीं श्रीं श्रीं ऐं ऐं ऐं महाकाली-महालक्ष्मी-महासरस्वतीरूपायै नवकोटिमूर्त्यै दुर्गायै नमः, ह्रीं ह्रीं ह्रीं दुर्गार्तिनाशिनी सन्तानसौख्यं देहि देहि, वन्ध्यत्वं मृतवत्सत्वं च हर हर गर्भरक्षां कुरु कुरु, सकलां बाधां कुलजां बाह्यजां कृतामकृतां च, नाशय नाशय सर्वगात्राणि रक्ष गर्भं पोषय पोषय, सर्वोपद्रवं शोषय शोषय स्वाहा।

अनेन कवचेनाऽङ्गं सप्तवाराऽभिमन्त्रितम् ।
ऋतुस्नाता जलं पीत्वा भवेद् गर्भवती ध्रुवम् ॥१४॥
गर्भपातभये पीत्वा दृढगर्भा प्रजायते ।
अनेन कवचेनाथ मार्जिताया निशागमे ॥१५॥
सर्वबाधा-विनिर्मुक्ता गर्भिणी स्यान्न संशयः ।
अनेन कवचेनेह ग्रन्थितं रक्तदोरकम् ॥१६॥
कटिदेशे धारयन्ती सुपुत्रसुखभागिनी ।
असूत पुत्रमिन्द्राणी जयन्तं यत्प्रभावतः ॥१७॥
गुरूपदिष्टं वंशाख्यं कवचं तदिदं सखे ।
गुह्याद् गुह्यतरं चेदं न प्रकाश्यं हि सर्वतः ।
धारणात् पठनादस्य वंशच्छेदो न जायते ॥१८॥

बाला विनश्यन्ति पतन्ति गर्भा-
स्तत्राऽबलाः कष्टयुताश्च वन्ध्याः ।
बालग्रहैर्भूतगणैश्च रोगै-
र्न यत्र धर्माचरणं गृहं स्यात् ॥१९॥

॥ इति श्रीज्ञानभास्करे वंशवृद्धिकरं वंशकवचं सम्पूर्णम् ॥

(टिप्पणी- प्रस्तुत वंशवृद्धिकर वंश-कवच सन्तान-प्राप्ति के लिए अत्यधिक उपयोगी एवं महत्त्वपूर्ण कवच है। विश्वास और श्रद्धा-भक्तिपूर्वक इसके नित्यप्रति पाठ करने से किसी प्रकार की भी सन्तान बाधा-भूत-प्रेतादि बाधा, ग्रह-बाधा, देव-बाधा एवं शत्रु कृत समस्त बाधाएँ विनष्ट हो जाती हैं और शीघ्र ही दीर्घजीवी सन्तान की प्राप्ति होती है।)

## ॥ श्रीजगन्नाथाष्टकम् ॥

कदाचित् कालिन्दीतटविपिनसङ्गीतकरवो
मुदाभीरीनारीवदनकमलास्वादमधुपः
रमाशम्भुर्ब्रह्माऽमरपतिगणेशार्चितपदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥१॥

भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे
दुकूलं नेत्रान्ते सहचरकटाक्षं विदधते ।
सदा श्रीमद्-वृन्दावनवसतिलीलापरिचयो
जगन्नाथः स्वामी नयनपथगामी भवतु मे॥२॥

महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादान्तः सहज बलभद्रेण बलिना ।
सुभद्रामध्यस्थः सकलसुरसेवाऽवसरदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥३॥

कृपापारावारः सजलजलदश्रेणिरुचिरो
रमावाणीरामः स्फुरदमलपद्मेक्षणमुखैः ।
सुरेन्द्रैराराध्यः श्रुतिगणशिखागीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥४॥

रथारूढो गच्छन् पथि मिलितभूदेव पटलैः
स्तुतिप्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः ।
दयासिन्धुर्बन्धुः सकलजगतां सिन्धुसुतया
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥५॥

परब्रह्मापीड़ः कुवलयदलोत्फुल्लनयनो

निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दो राधासरसवपुरालिङ्गनसुखो
जगन्नाथः स्वामी नयनपथगामीभवतु मे ।।६।।

न वै याचे राज्यं न च कनक माणिक्य विभवं
न याचेऽहं रम्यां सकलजनकाम्यां वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे।।७।।

हर त्वं संसारं द्रुततरमसारं सुरपते
हर त्वं पापानां विततिमपरां यादवपते ।
अहो दीनानाथं निहितमचलं निश्चितपदं
जगन्नाथः स्वामी नयनपथगामी भवतु मे ।।८।।

जगन्नाथाष्टकं पुन्यं यः पठेत् प्रयतः शुचिः ।
सर्वपापविशुद्धात्मा विष्णुलोकं स गच्छति ।।९।।

।। इति श्रीमत् शङ्कराचार्यविरचितं जगन्नाथाष्टकं सम्पूर्णम् ।।

## ॥ श्रीहनुमान-चालीसा ॥

दोहा

श्रीगुरु चरन सरोज रज
निज मनु मुकुरु सुधारि ।
बरनऊँ रघुबर बिमल जसु
जो दायकु फल चारि ॥
बुद्धिहीन तनु जानिके
सुमिरौं पवनकुमार ।
बल बुद्धि बिद्या देहु मोहिं
हरहु कलेस बिकार ॥

चौपाई

जय हनुमान ज्ञान गुन सागर ।
जय कपीस तिहुँ लोक उजागर ॥
राम दूत अतुलित बल धामा ।
अंजनिपुत्र पवनसुत नामा ॥
महाबीर बिक्रम बजरंगी ।
कुमति निवार सुमति के संगी ॥
कंचन बरन बिराज सुबेसा ।
कानन कुंडल कुंचित केसा ॥
हाथ बज्र औ ध्वजा बिराजै ।
काँधे मूँज जनेऊ साजै ॥
संकर सुवन केसरीनंदन ।

तेज प्रताप महा जग बंदन ॥
विद्यावान गुनी अति चातुर ।
राम काज करिबे को आतुर ॥
प्रभु चरित्र सुनिबे को रसिया ।
राम लखन सीता मन बसिया ॥
सूक्श्म रूप धरि सियहिं दिखावा ।
बिकट रूप धरि लंक जरावा ॥
भीम रूप धरि असुर सँहारे ।
रामचंद्र के काज सँवारे ॥
लाय सजीवन लखन जियाये ।
श्रीरघुबीर हरषि उर लाये ॥
रघुपति कीन्ही बहुत बड़ाई ।
तुम मम प्रिय भरतहि सम भाई ॥
सहस बदन तुम्हरो जस गावैं ।
अस कहि श्रीपति कंठ लगावैं ॥
सनकादिक ब्रह्मादि मुनीसा ।
नारद सारद सहित अहीसा ॥
जम कुबेर दिगपाल जहाँ ते ।
कबि कोबिद कहि सके कहाँ ते ॥
तुम उपकार सुग्रीवहिं कीन्हा ।
राम मिलाय राज पद दीन्हा ॥
तुम्हरो मंत्र बिभीषन माना ।
लंकेस्वर भए सब जग जाना ॥
जुग सहस्र जोजन पर भानू ।
लील्यो ताहि मधुर फल जानू ॥
प्रभु मुद्रिका मेलि मुख माहीं ।

जलधि लाँघि गये अचरज नाहीं ॥
दुर्गम काज जगत के जेते ।
सुगम अनुग्रह तुम्हरे तेते ॥
राम दुआरे तुम रखवारे ।
होत न आज्ञा बिनु पैसारे ॥
सब सुख लहै तुम्हारी सरना ।
तुम रच्छक काहू को डर ना ॥
आपन तेज संहारो आपै ।
तीनों लोक हाँक तें काँपै ॥
भूत पिसाच निकट नहिं आवै ।
महाबीर जब नाम सुनावै ॥
नासै रोग हरै सब पीरा ।
जपत निरंतर हनुमत बीरा ॥
संकट तें हनुमान छुड़ावै ।
मन क्रम बचन ध्यान जो लावै ॥
सब पर राम तपस्वी राजा ।
तिन के काज सकल तुम साजा ॥
और मनोरथ जो कोई लावै ।
सोई अमित जीवन फल पावै ॥
चारों जुग परताप तुम्हारा ।
है परसिद्ध जगत उजियारा ॥
साधु संत के तुम रखवारे ।
असुर निकंदन राम दुलारे ॥
अष्ट सिद्धि नौ निधि के दाता ।
अस बर दीन जानकी माता ॥
राम रसायन तुम्हरे पासा ।

सदा रहो रघुपति के दासा ॥
तुम्हरे भजन राम को पावै ।
जनम जनम के दुख बिसरावै ॥
अंत काल रघुबर पुर जाई ।
जहाँ जन्म हरिभक्त कहाई ॥
और देवता चित्त न धरई ।
हनुमत सेई सर्ब सुख करई ॥
संकट कटै मिटै सब पीरा ।
जो सुमिरै हनुमत बलबीरा ॥
जै जै जै हनुमान गोसाईं ।
कृपा करहु गुरु देव की नाईं ॥
जो सत बार पाठ कर कोई ।
छूटहि बंदि महा सुख होई ॥
जो यह पढ़ै हनुमान चलीसा ।
होय सिद्धि साखी गौरीसा ॥
तुलसीदास सदा हरि चेरा ।
कीजै नाथ हृदय मँह डेरा ॥

दोहा

पवनतनय संकट हरन
मंगल मूरति रूप ।
राम लखन सीता सहित
हृदय बसहु सुर भूप ॥

## ॥ अथ सप्तश्लोकी दुर्गा ॥

शिव उवाच -

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनी ।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः॥

देव्युवाच -

शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ॥

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा।
बलादाकृष्य मोहाय महामाया प्रयच्छति॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

॥ इति श्रीसप्तश्लोकी दुर्गा सम्पूर्णा ॥

## ॥ तन्त्रोक्तं रात्रिसूक्तम् ॥

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥१॥

ब्रह्मोवाच

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥२॥

अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥३॥

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥४॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥५॥

महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ॥६॥

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥८॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥९॥

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥१०॥

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥११॥

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥१२॥

विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१३॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१४॥

प्रबोधं न जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥१५॥

॥ इति तन्त्रोक्तं रात्रिसूक्तं सम्पूर्णम् ॥

## ॥ अथ तन्त्रोक्तं देवीसूक्तम् ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥१॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥२॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥

या देवी सर्वभूतेषुच्छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥२७॥

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥२९॥

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥३०॥

॥ इति तन्त्रोक्तं देवीसूक्तं सम्पूर्णम् ॥

शुक्लयुजर्वेदीया

# शतरुद्री

सम्पादकः

**डॉ.देवेन्द्रप्रसादमिश्रः**

# 卐 शुक्लयजुर्वेदीया शतरुद्री 卐

॥ हरिःॐ ॥

नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः । बाहुभ्यामुत ते नमः ॥१॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥२॥
यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवाङ्गिरित्र तां कुरु मा हिꣳसीः पुरुषञ्जगत् ॥३॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमनाऽअसत् ॥४॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव ॥५॥
असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेडऽईमहे ॥६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपाऽअदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्तऽइषवः परा ता भगवो वप ॥९॥
विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥१०॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥११॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥१२॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्ल्यानाम्मुखा शिवो नः सुमना भव ॥१३॥
नमस्तऽआयुधायानातताय धृष्णवे ।
उभाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्वने ॥१४॥
मा नो महान्तमुत मा नोऽअर्ब्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्वो रुद्र रीरिषः ॥१५॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्श्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्म्मन्तः सदमित्त्वा हवामहे ॥१६॥

नमो हिरण्ण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमो नमो वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमो नमः शष्प्पिञ्जराय त्त्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बब्भ्लुशाय ॥१७॥
नमो बब्भ्लुशाय व्व्याधिनेन्नानाम्पतये नमो नमो भवस्य हेत्त्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्त्राणाम्पतये नमो नमः सूतायाहन्न्त्यै वनानाम्पतये नमो नमो रोहिताय ॥१८॥
नमो रोहिताय स्त्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणिजाय कक्क्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्क्रन्दयते पत्तीनाम्पतये नमो नमः कृत्स्नायतया ॥१९॥
नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय निव्व्याधिनऽआव्व्याधिनीनाम्पतये नमो नमो निषङ्ग्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्ण्यानाम्पतये नमो नमो वञ्चते ॥२०॥
नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्ग्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिब्भ्यो जिघाꣳसद्भ्यो मुष्ण्णताम्पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥२१॥
नमऽउष्ण्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नमऽइषुमद्भ्यो धन्वायिब्भ्यश्च वो नमो नमऽआतन्वानेब्भ्यः प्प्रतिदधानेब्भ्यश्च वो नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥
नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्ग्रद्भ्यश्च वो नमो नमः शयानेब्भ्यऽआसीनेब्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाब्भ्यः ॥२३॥

नम॑ः सुभाभ्य॑ः सुभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम॑ऽ आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नमऽउगणाभ्यस्तृᳪहतीभ्यश्च वो नमो नमो गुणेभ्य॑ः ॥२४॥
नमो गुणेभ्यो गुणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ॥२५॥
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽअरथेभ्यश्च वो नमो नम॑ः क्षत्तृभ्य॑ः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नम॑ः ॥२६॥
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्य॑ः पुञ्जिष्ठेभ्यश्च वो नमो नम॑ः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्य॑ः ॥२७॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नम॑ः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नम॑ः कपर्दिने ॥२८॥
नम॑ः कपर्दिने च व्युप्तकेशाय च नम॑ः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥२९॥
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च नम॑ऽआशवे ॥३०॥
नम॑ऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥
नमो ज्येष्ठाय च कनिष्ठाय च नम॑ः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नमः सोभ्याय ॥३२॥
नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम॑ऽउर्वर्याय च खल्याय च नमो वन्याय ॥३३॥
नमो वन्याय च कक्ष्याय च नम॑ः श्रवाय च प्रतिश्रवाय च नम॑ऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ॥३४॥
नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नम॑ः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे ॥३५॥
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नम॑स्तीक्ष्णेषवे चायुधिने च नम॑ः स्वायुधाय च सुधन्वने च ॥३६॥

नमः॒ स्रुत्या॑य च॒ पथ्या॑य च॒ नमः॒ काट्या॑य च॒ नीप्या॑य च॒ नमः॒ कुल्या॑य च
सर॒स्या॑य च॒ नमो॑ नादे॒याय॑ च वैश॒न्ताय॑ च॒ नमः॒ कूप्या॑य ॥३७॥
नमः॒ कूप्या॑य चावट्या॑य च॒ नमो॒ वीध्र्या॑य चात॒प्या॑य च॒ नमो॒ मेघ्या॑य च
विद्युत्या॑य च॒ नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒ नमो॒ वात्या॑य ॥३८॥
नमो॒ वात्या॑य च॒ रेष्म्या॑य च॒ नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च॒ नमः॒ सोमा॑य च
रु॒द्राय॑ च॒ नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒ नम॑ः श॒ङ्गवे॑ ॥३९॥
नम॑ः श॒ङ्गवे॑ च पशु॒पत॑ये च॒ नम॑ऽउ॒ग्राय॑ च भी॒माय॑ च॒ नमो॑ऽग्रेव॒धाय॑ च दूरेव॒-
धाय॑ च॒ नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ नम॑स्ता॒राय॑ ॥४०॥
नम॑ः शम्भ॒वाय॑ च मयोभ॒वाय॑ च॒ नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नम॑ः शि॒वाय॑
च शि॒वत॑राय च ॥४१॥
नमः॒ पार्या॑य चावा॒र्या॑य च॒ नम॑ः प्र॒तर॑णाय चो॒त्तर॑णाय च॒ नम॑स्ती॒र्थ्या॑य च॒
कूल्या॑य च॒ नमः॒ शष्प्या॑य च॒ फेन्या॑य च॒ नम॑ः सिक॒त्या॑य ॥४२॥
नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च॒ नम॑ः कि॒ꣳशि॒लाय॑ च क्षय॒णाय॑ च॒ नम॑ः कप॒र्दिने॑
च पुल॒स्तये॑ च॒ नम॑ऽइरि॒ण्या॑य च प्रप॒थ्या॑य च॒ नमो॒ व्रज्या॑य ॥४३॥
नमो॒ व्रज्या॑य च॒ गोष्ठ्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नमो॑ हृद॒य्या॑य च
निवे॒ष्प्या॑य च॒ नमः॒ काट्या॑य च गह्वरे॒ष्ठाय॑ च॒ नमः॒ शुष्क्या॑य ॥४४॥

नमः॒ शुष्क्या॑य च हरि॒त्या॑य च॒ नम॑ः पाꣳस॒व्या॑य च रज॒स्या॑य च॒ नमो॒
लोप्या॑य चोल॒प्या॑य च॒ नम॒ऽऊर्व्या॑य च॒ सूर्व्या॑य च॒ नम॑ः प॒र्ण्याय॑ ॥४५॥
नम॑ः प॒र्ण्याय॑ च पर्णश॒दाय॑ च॒ नम॑ऽउ॒द्गुर॑माणाय चाभिघ्न॒ते च॒ नम॑ऽआखिद॒ते
च॑ प्रखिद॒ते च॒ नम॑ऽइषु॒कृद्भ्यो॑ धनु॒ष्कृद्भ्य॑श्च वो॒ नमो॒ नमो॑ वः॒ किरि॒केभ्यो॑
दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विचिन्व॒त्केभ्यो॒ नमो॑ विक्षिण॒त्केभ्यो॒ नम॑ऽआनिर्ह॒-
तेभ्य॑ः ॥४६॥

द्रापे॒ऽअन्ध॑सस्पते॒ दरि॑द्र॒ नील॑लोहित ।
आ॒सां प्र॒जाना॑मे॒षां प॑शू॒नां मा भेर्मा रोङ्मो च॑ नः॒ किञ्च॒नाम॑मत् ॥४७॥
इ॒मा रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्र भ॑रामहे म॒तीः ।
यथा॒ शमस॑द्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ऽअ॒स्मिन्न॑नातु॒रम् ॥४८॥
या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाहा॑ भेष॒जी ।
शि॒वा रु॒तस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑ ॥४९॥

परि॑ नो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दुर्म्म॒तिर॑घा॒योः ।
अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृड ॥५०॥
मीढु॑ष्टम॒ शिव॑तम शि॒वो नः॑ सु॒मना॑ भव ।
प॒र॒मे वृ॒क्षऽआयु॑धन्नि॒धाय॒ कृत्तिं॒ वसा॑न॒ऽआच॑र॒ पिना॑कं॒ बिभ्र॒दाग॑हि ॥५१॥
विकि॑रिद्र॒ विलो॑हित॒ नम॑स्तेऽअस्तु भगवः ।
यास्ते॑ स॒हस्र॑ᳫं हे॒तयो॒ऽन्यम॒स्मन्निव॑पन्तु॒ ताः ॥५२॥
स॒हस्रा॑णि सहस्र॒शो बा॒ह्वोस्तव॑ हे॒तयः॑ ।
तासा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि ॥५३॥
अ॒सं॒ख्या॒ता स॒हस्रा॑णि॒ ये रु॒द्राऽअधि॒ भूम्या॑म् ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५४॥
अ॒स्मिन्म॑ह॒त्य॒र्ण॒वे॒ऽन्तरि॑क्षे भ॒वाऽअधि॑ ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५५॥
नील॑ग्रीवाः शिति॒कण्ठा॒ दिव॑ᳫं रु॒द्राऽउप॑श्रिताः ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५६॥
नील॑ग्रीवाः शिति॒कण्ठाः॑ श॒र्वाऽअ॒धः क्ष॑माच॒राः ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५७॥
ये वृ॒क्षेषु॑ श॒ष्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५८॥
ये भू॒ताना॒मधि॑पतयो विशि॒खासः॑ कप॒र्दिनः॑ ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥५९॥
ये प॒थां प॑थि॒रक्ष॑यऽऐलबृ॒दाऽआ॑यु॒र्युधः॑ ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥६०॥
ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काह॑स्ता नि॒षङ्गि॑णः ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥६१॥
येऽन्ने॑षु वि॒विध्य॑न्ति॒ पात्रे॑षु॒ पिब॑तो॒ जना॑न् ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥६२॥
यऽए॒ताव॑न्तश्च॒ भूया॑ᳫंसश्च॒ दिशो॑ रु॒द्रा वि॑तस्थि॒रे ।
तेषा॑ᳫं सहस्रयोज॒नेव॒ धन्वा॑नि तन्मसि ॥६३॥

नमोस्तु रुद्रेभ्यो ये दिवि येषाँवर्षमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः। तेभ्यो नमोऽअस्तु ते नोवन्तु ते नो मृडयन्तु ते
यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६४॥

नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषाँवातऽइषवः। तेभ्यो दश प्राचीर्दश दक्षिणा
दश प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः। तेभ्यो नमोऽअस्तु ते नोवन्तु ते नो मृडयन्तु ते
यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६५॥

नमोस्तु रुद्रेभ्यो ये पृथिव्याँय्येषामन्नमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा
दश प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः। तेभ्यो नमोऽअस्तु ते नोवन्तु ते नो मृडयन्तु ते
यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६६॥

नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः। बाहुभ्यामुत ते नमः ॥६७॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥६८॥

यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवाङ्गिरित्र ताङ्कुरु मा हिँसीः पुरुषञ्जगत् ॥६९॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मँ सुमनाऽअसत् ॥७०॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुव ॥७१॥

असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः।
ये चैनँ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोवैषाँ हेडऽईमहे ॥७२॥

असौ योवसर्पति नीलग्रीवो विलोहितः।
उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७३॥

नमोस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्त्वानोहन्तेब्भ्योकरन्नमः ॥७४॥
प्रमुञ्च धन्न्वनस्त्वमुभयोरात्क्वर्योर्ज्ज्याम् । याश्च ते हस्तऽइषवः परा ता भगवो वप ॥७५॥
विज्ज्यन्धनुः कपर्द्दिनो विशल्ल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥७६॥
या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्म्मान्विश्श्वतस्त्वमयक्ष्मया परिभुज ॥७७॥
परि ते धन्न्वनो हेतिरस्म्मान्वृणक्तु विश्श्वतः ।
अथो यऽइषुधिस्तवारेऽअस्म्मन्निधेहि तम् ॥७८॥
अवतत्त्य धनुष्ट्वँ सहस्राक्ष शतेषुधे ।
निशीर्ष्य शल्ल्यानाम्मुखा शिवो नः सुमना भव ॥७९॥
नमस्तऽआयुधायानातताय धृष्णवे ।
उभाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्न्वने ॥८०॥
मा नो महान्तमुत मा नोऽअर्ब्भकम्मा नऽउक्क्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्न्वो रुद्र रीरिषः ॥८१॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्श्वेषु रीरिषः ।
मा नो वीरान्नुद्र भामिनो वधीर्हविष्म्मन्तः सदमित्त्वा हवामहे ॥८२॥
एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥८३॥
अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् ॥८४॥
नमस्ते रुद्र मन्न्यवऽउतो तऽइषवे नमः । बाहुब्भ्यामुत ते नमः ॥८५॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्न्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥८६।
न तँविदाथ यऽइमा जजानान्न्यद्युष्म्माकमन्तरम्बभूव ।
नीहारेण प्प्रावृता जल्प्प्या चासुतृपऽउक्क्थशासश्चरन्ति ॥८७॥
विश्श्वकर्म्मा ह्व्यजनिष्ट देवऽआदिद्गन्धर्वोऽअभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपाङ्गर्ब्भँव्यदधात्पुरुत्रा ॥८८॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्षऽआयुधन्निधाय कृत्तिं वसानऽआचर पिनाकम्बिभ्रदागहि ॥८९॥
विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः ।
यास्ते सहस्रँ हेतयोन्यमस्मन्निवपन्तु ताः ॥९०॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥९१॥
असङ्ख्याता सहस्राणि ये रुद्राऽअधि भूम्याम् ।
तेषाँ सहस्रयोजनेव धन्वानि तन्मसि ॥९२॥
वयँ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥९३॥
एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥९४॥
अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् ॥९५॥
भेषजमसि भेषजङ्गवेश्वाय पुरुषाय भेषजम् । सुखम्मेषाय मेष्यै ॥९६॥
त्र्यम्बकँयजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।
त्र्यम्बकँयजामहे सुगन्धिम्पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥९७॥
एतत्ते रुद्रावसन्तेन परो मूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासा
ऽअहिँसन्नः शिवोतीहि ॥९८॥
त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥९९॥
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिँसीः । निवर्त्तयाम्यायुषे-
न्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥१००॥

प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ।
प्रीणन्तु पितरः सर्वे प्रीणन्तु च महर्षयः॥

बलं विष्णोः प्रवर्धताम्

## ॥ सम्पादककृदात्मवृत्तम् ॥

नमोऽस्तु शुक्राश्रयवामनाय
नमोऽस्तु विप्रोत्सव भार्गवाय ।
नमोऽस्तु सीताहितराघवाय
नमोऽस्तु पार्थस्तुतयादवाय ॥१॥
नमोऽस्तु बुद्धाय विमोहकाय
नमोऽस्तु ते कल्किपदोदिताय ।
नमोऽस्तु पूर्णामितसद्गुणाय
समस्तनाथाय हयाननाय ॥२॥

चत्वारस्तनया आसन् वासुदेवमहात्मनः ।
पयासीवासिनस्तस्य ब्रह्मधर्मावलम्बिनः ॥३॥

दयाधर्मसदाचारैर्विश्रुतस्य यशस्विनः ।
ग्रामक्षेत्रे समाजेषु मानस्तस्य जने जने ॥४॥

गण्डकीनामधेयायाः देवनद्यास्तटे शुभे ।
सरयूसन्निधौ दिव्ये पयासी पत्तनं प्रियम् ॥५॥

भार्गवश्च्यवनश्चौर्व आप्नवान् जामदग्न्यकः ।
प्रवराः सामवेदश्च शाखा तु कौथुमी मता ॥६॥

त्रयोदशगृहे विष्णुः कुलदेवः प्रतिष्ठितः ।
पयासी छपिया ख्याता मर्यादा वर्तते कुले ॥७॥

वत्स इति श्रुतो लोके महर्षिः प्रथितोऽन्वये ।
वासुदेवसमाख्याता पूर्वजः सज्जनो महान् ॥८॥

धर्मार्थकाममोक्षास्ते प्रभुरविपरावरौ ।
वैद्यनाथमहावीरौ संज्ञा साधु सुसत्तमा ॥९॥

श्रीसन्तोषीतिजीया च श्रीत्रिवेणीवृजौ तथा ।
रामसखीति नाम्नाऽपि सन्ततयोऽभवन् शुभाः ॥१०॥

कमलाफूलमत्यान्या उमासत्यवती तथा ।
सावित्रीसौम्यशालीनाः कुलालङ्कारशोभनाः ॥११॥

सुनीता सविता चापि वंशपरम्पराक्रमाः ।
अनुरूपपितुः पूर्णाः मातुस्नेहवशंवदाः ॥१२॥

धर्मज्ञानानुरक्ता वै मन्ये विधातुरिच्छया ।
षट्शास्त्रसम्मताः जाताः नन्दकुमारसूनवः ॥१३॥

ज्ञानेन्द्रराजेन्द्रसमस्वरूपौ
वीरेन्द्रदेवेन्द्रसमानशीलौ ।
ब्रह्मेन्द्रसंज्ञश्च शिवस्तथा वै
विद्याविभाभूषितवाग्विलासैः ॥१४॥

मध्यप्रदेशभूभागे बाणभट्टमहाकवेः ।
काव्यसंसाधना यत्र शोणभद्रतटे शुभे ॥१५॥

साम्प्रतं वासभूमिर्नवाभीतरी
ग्रामपत्रालयौ भीतरी भीतरी।
मण्डलं मण्डनं चारु श्रीधीश्रुतं
संस्कृतस्यात्र विद्यालयो राजते ॥१६॥

शोणभद्रतटे तत्र विद्यते भीतरीगृहम् ।
सपरिवारवासोऽस्ति सतां कृपाकणस्पृहा ॥१७॥

# सन्दर्भग्रन्थसूची


1. अग्निपुराणम्, महर्षिवेदव्यासप्रणीतम् गीताप्रेसगोरखपुरम् 273005 पुनर्मुद्रणवर्षम्

2. अथर्ववेदसंहिता, सायणभाष्यम्, चौखम्बासुरभारती प्रकाशनम्, वाराणसी 1987

3. अथर्ववेदसंहिता, श्रीकण्ठशास्त्री धर्मप्रेस, 203 ए कमलानगरम्, देहली 2000

4. अथर्ववेदीयमन्त्रविद्या, दयानन्दसंस्थानम्, हरध्यानसिंहमार्गः, देहली, 1997

5. अथर्ववेदभाष्यम्, चौधरीप्रतापसिंहः धर्मार्थट्रस्ट, 57 एल., मॉडलटाउन-करनालम्, 1975

6. अष्टाध्यायी, चन्द्रलेखा-हिन्दीव्याख्यायुता चौखम्बाविद्याभवनम्, वाराणसी 1995

7. अर्थसंग्रहः, लौगाक्षिभास्करप्रणीतः, चौखम्बासुरभारती प्रकाशनम्, गोपाल-मन्दिर-लेन, वाराणसी 2010

8. आर्षेयब्राह्मणम्, वर्नल-सम्पादितम् तिरुपतिः 1992

9. ईशादि नौ उपनिषद्, शङ्करभाष्यार्थः गीताप्रेस, गोरखपुरम् पुनर्मुद्रण वि.सं. 2071

10. ऐतरेयब्राह्मणम्, ए. हॉग, सम्पादितम् कोलकाता 1961

11. ऋग्वेदसंहिता, पद्मभूषणम् : डॉ. श्रीपाददामोदरसातवलेकरः किल्लापारडी, जि. बलसाड स्वाध्यायमण्डलम्, 1985

12. ऋग्वेदसंहिता, नागपब्लिशर्स 11 ए, यू. ए. जवाहरनगरम्, देहली 2001

13. ऋग्वेदसंहिता, श्रीमोक्षमूलरभट्टः, चौखम्बासंस्कृतसीरीज, वाराणसी 1966

14. ऋग्वेदभाष्यभूमिका, सायणाचार्यः, वैदिकपुस्तकालयः, दयानन्दाश्रमः, अजमेरः 1996

15. ऋग्वेद, कासुबोध् भाष्यम्, पद्मभूषण-डॉ.श्रीपाददामोदर सातवलेकरः, किल्लापारडी, जि. बलसाड, स्वाध्यायमण्डलम् 1985

16. काव्यप्रकाशः, मम्मटाचार्यः, चौखम्बासंस्कृतसीरीज, वाराणसी पुनर्मुद्रणवर्षम्

17. कात्यायनश्रौतसूत्रम्, महर्षिकात्यायनमुनिप्रणीतं कर्काचार्य-याज्ञिकादिकृतभाष्येभ्यः सारमुद्धृत्य डॉ. अल्बेर्तेन वेबरेण शोधितम् चौखम्बासंस्कृतसीरिज, वाराणसी आफिस वाराणसी-1, वि. सं. 2029

18. कूर्मपुराणम्, महर्षिवेदव्यासप्रणीतम् गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम्

19. कौषीतकीब्राह्मणम्, कोलकाता 1962

20. कृष्णयजुर्वेदीयतैत्तिरीयसंहिता, सम्पादकः श्रीपाददामोदरपारडीनगरम्, सातवलेकरः बलसाडप्रदेशः, गुजरातप्रान्ते स्वाध्यायमण्डलं आषाढस्य वि.सं. 2014

21. कृष्णयजुर्वेदीयतैत्तिरीयारण्यकम्, भट्टभास्करभाष्योपेतम् मोतीलालबनारसीदासः, जवाहरनगरम् दिल्ली-07 पुनर्मुद्रण वर्षम् 1985

22. गरुणपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

23. चार शुल्बसूत्र, (बौधायन, मानव, आपस्तम्ब और कात्यायन) डॉ. रघुनाथपुरुषोत्तम–कुलकर्णी महर्षिसान्दीपनिराष्ट्रिय–वेदविद्या–प्रतिष्ठानम्, उज्जैन्याम् 456010 म. प्र. 2003

24. छान्दोग्योपनिषद्, सानुवादशाङ्कर–भाष्यसहितम् गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रण वि.सं. 2070

25. तैत्तिरीयसंहिता, महादेवशास्त्रिसम्पादितः मैसूर 1996

26. तैत्तिरीयब्राह्मणम्, भट्टभास्कर–भाष्योपेतम् मोतीलालबनारसीदासः, बंगलो–रोड़–जवाहरनगरम्, दिल्ली पुनर्मुद्रण वर्षम् 1985

27. देवीभागवतपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

28. धर्मशास्त्र का इतिहास, डॉ. पि.वि काणे भाण्डारकर ओरियेन्टाल इनस्टिट्युट पुनर्मुद्रणवर्षम्

29. निरुक्तम्, यास्काचार्यः, चौखम्बाप्रकाशनम्, वाराणसी 1992

30. पद्मपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

31. पारस्करगृह्यसूत्रम्, डॉ. जगदीशचन्द्रमिश्रः, चौखम्बाप्रकाशनम् 2008

32. पुराणविमर्शः, डॉ. बलदेव उपाध्यायः, चौखम्बाविद्याभवनम् 1996

33. बृहदारण्यकोपनिषद्, सानुवादशङ्करभाष्यसहितम्, गीताप्रेस–गोरखपुरम्–273005 पुनर्मुद्रणम् वि.सं.2071

34. ब्रह्मपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

35. ब्रह्मवैवर्तपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

36. बौधयनश्रौतसूत्रम्, सायणाचार्यभाष्यसहितम्, रामलालकपूर ट्रस्ट रेवली, सोनीपत, हरियाणा–39 वि.सं.2065

37. भविष्यपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

38. भारतीय, दर्शन डॉ. बलदेव उपाध्यायः, चौखम्बा–विद्याभवनं वाराणसी 1997

39. मनुस्मृतिः, कुल्लूकभट्ट कृत–सुपरिमार्जितम्, मन्वर्थमुक्तावली–सहिता चौखम्बा विद्याभवनम्, वाराणसी 1992

40. महाभारतम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

41. मत्स्यमहापुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवर्षम्

42. मार्क्सवाद और रामराज्य, स्वामीश्रीकरपात्रीजीमहाराजः, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणम् वि.सं. 2070

43. मार्कंडेयपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्–273005 पुनर्मुद्रणवषम्

44. मैत्रायणीसंहिता, श्रेडरसम्पादितः लाडय जिंग मैसूरः 1982

45. यजुर्वेदे वैश्विकचिन्तनम्, लेखकः म.म. प्रो. देवेन्द्रप्रसादमिश्रः शोध-प्रकाशनविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत विश्वविद्यालयः नवदेहली-110016, 2022

46. वाजसनेयिसंहिता, बेवरसम्पादितः निर्णयसागरप्रेस, मुम्बई 1962

47. नन्दकुमारचरितम्, लेखकः-म.म. प्रो. केशवराम शर्मा, व्याख्याकारः प्रो.रामसलाहीद्विवेदी, प्रो. वेदप्रकाश उपाध्यायः, प्रो. कमलेशकुमारशर्मा, एवं चक्रपाड़िः च चौखम्बासुरभारती-प्रकाशनम्, वाराणसी 2021

48. नारदपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम्

49. नीतिशतकम्, भर्तृहरिः, चौखम्बासंस्कृतसीरीज, वाराणसी पुनर्मुद्रणवर्षम्

50. लिङ्गपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम्

51. वामनपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम्

52. वाराहपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम्

53. वंशब्राह्मणम्, सत्यव्रतसामश्रमीसम्पादितम्, केन्द्रीयसंस्कृत-विश्वविद्यालयः, तिरुपतिः 2001

54. विष्णुपुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम्

55. वैदिक साहित्य एवं संस्कृति, आचार्यबलदेव उपाध्यायः, रवीन्द्रपुरी, वाराणसी 1995

56. वेदशाखापर्यालोचनम्, प्रो.श्रीकिशोरमिश्रः, चौखम्बाविद्याभवनम्, वाराणसी 1991

57. वैदिक कोश, नाग प्रकाशकः, देहली 1995

58. वेदार्थपारिजातः, स्वामीश्रीकरपात्रीजीमहाराजः, श्रीराधाकृष्ण-धानुकाप्रकाशनसंस्थानम् श्रीधर्मसंघसंस्कृत-विद्यालयः, रमणरेती, वृन्दावनम् 281121 वि.सं. 2055

59. शतपथब्राह्मणम्, आनन्दचन्द्र-सम्पादितम्, चौखम्बाप्रकाशनम्, वाराणसी 1961

60. शतपथब्राह्मणम्, श्रीमत्सायणाचार्य-वेदार्थप्रकाशाख्यादिभाष्यम् चौखम्बासंस्कृतसीरीज, वाराणसी 1975

61. शतपथब्राह्मणम्, हिन्दीव्याख्याकारः प्रो. श्रीयुगलकिशोरमिश्रः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः, वाराणसी 2007

62. शिवमहापुराणम्, महर्षिवेदव्यासप्रणीतम् गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणवर्षम् 1997

63. शुक्लयजुर्वेदीयमाध्यन्दिनि पञ्चपाठपौरुषाध्यायः, प्रो. श्रीकिशोरमिश्रः चौखम्बाविद्याभवनम्, वाराणसी 1985

64. शुक्लयजुर्वेदसंहिता, उव्वट-महीधर-भाष्यम् चौखम्बाप्रकाशनम्, वाराणसी 1996

65. शुक्लयजुर्वेदीयप्रातिशाख्यम्, उव्वटभाष्य तथा अनन्तभट्ट कृत-भाष्य सहितम्, हिन्दी अनुवादकः- डॉ. वीरेन्द्रकुमारवर्मा, चौखम्बाविद्याभवनम्, वाराणसी 1995

66. शुक्लयजुर्वेदीयकाण्वसंहिता, सम्पादकः-पं.श्रीपाददामोदर सातवलेकरः स्वाध्यायमण्डलं, बलसाड, गुजरातप्रान्त शाकीयवर्षम् 1862

67. शुल्बसूत्रम् हिन्दीव्याख्याकारः, प्रो. देवेन्द्रप्रसादमिश्रः, सम्पादकः श्रीकेदारनाथद्विवेदी, चौखम्बासुरभारती-प्रकाशनम्, 2015 वाराणसी

68. शुक्लयजुर्वेदीया शतरुद्री, भाषानुवादकः डॉ. देवेन्द्रप्रसादमिश्रः, प्रकाशनाधीन- श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः 2022

69. शुक्लयजुर्वेदीय-गर्भाधानादिषोडश-संस्कारपद्धतिविमर्शः, म.म. आचार्यश्रीकेदारनाथद्विवेदी, प्रो. देवेन्द्रप्रसादमिश्रः प्रयागराजः 2021

70. स्कंदपुराणम्, गीताप्रेसगोरखपुरम्-पुनर्मुद्रणवर्षम् 273005

71. सत्यार्थप्रकाशः, श्रीमद्स्वामिदयानन्दसरस्वती आर्षसाहित्यप्रचार-ट्रस्ट, 427 नया बांस, दिल्ली-110006 वि.सं. 2071

72. सामवेदसंहिता, सायणाचार्यः, चौखम्बासंस्कृतसीरीज, वाराणसी 1966

73. श्रीमद्भगवद्गीता, वेदव्यासः, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणम् वि.सं. 2062

74. श्रीमद्भागवतमहापुराणम्, महर्षिवेदव्यासप्रणीतम्, गीताप्रेसगोरखपुरम्-273005 पुनर्मुद्रणम् वि.सं. 2052

75. श्रीमद्वावाल्मीकीय-रामायणम्, महर्षिवाल्मीकिप्रणीतम्, गीताप्रेस-गोरखपुरम् वि.सं. 2071

76. श्रीमद्रामचरितमानसम्, श्रीमद्गोस्वामितुलसीदासविरचितम्, गीताप्रेसगोरखपुरम् वि.सं. 2071

72. स्वोपज्ञशुल्बसूत्रसहितं कात्यायन-श्रौतसूत्रम्, श्रीविद्याधरशर्मा-वृत्तिसहितं, हिन्दीव्याख्याकारः श्रीकेदारनाथद्विवेदी- सम्पादकः प्रो. देवेन्द्रप्रसादमिश्रः चौखम्बासुरभारती प्रकाशनम्, वाराणसी, प्रथमसंस्करणम् 2015

ॐ

प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ।
प्रीणन्तु पितरः सर्वे प्रीणन्तु च महर्षयः ॥

# ॥ समाप्तमिदं ग्रन्थरत्नम् ॥



॥ बलं विष्णोः प्रवर्धताम् ॥

# लेखक परिचय

**महामहोपाध्याय श्रीकेदारनाथ द्विवेदी 'वेदाचार्य'**

वेदविद्या के विशिष्ट विद्वान् म.म. आचार्य श्रीकेदारनाथ द्विवेदी (पिता श्री रक्षा द्विवेदी माता श्री फूलपत्ती देवी) का जन्म उत्तर प्रदेश के देवरिया मण्डलान्तर्गत सलेमपुर ब्लाक में देवनदी 'सरयू' के किनारे ग्राम- धनौतीराय, पत्रालय-पिपरारामधर के साधारण ब्राह्मण परिवर में 15 जनवरी, 1934 को हुआ। आपने प्रारम्भिक शिक्षा गाँव से ग्रहण कर संस्कृत जगत् में प्रवेश किया। सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी से शास्त्री एवं वेदाचार्य की उपाधि ग्रहण की तथा शास्त्री एवं आचार्य में आपको स्वर्णपदक प्राप्त हुआ। तदुपरान्त सागर विश्वविद्यालय, सागर (म.प्र.) से बी.ए., एवं बी.एड. की उपाधि प्राप्त कर अवधेश प्रताप सिंह विश्वविद्यालय रीवा म.प्र. से संस्कृत विषय में एम.ए. की उपाधि प्राप्त की। आचार्य द्विवेदी ने म.प्र. शासन के अन्तर्गत 16 नवम्बर, 1962 से शासकीय सेवा में अपनी यात्रा रायपुर से आरम्भ किया। तदुपरान्त आप शासकीय वेङ्कट संस्कृत महाविद्यालय रीवा म.प्र. एवं शासकीय संस्कृत महाविद्यालय भितरी, सीधी, मध्यप्रदेश में 31 जनवरी, 1994 तक व्याख्याता वेद के पद पर सेवारत थे। आपने अनेक महाविद्यालयों एवं विश्वविद्यालयों में आयोजित राष्ट्रीय स्तर की सङ्गोष्ठियों में वेद विषयक व्याख्यान दिये। आपके अनेक शोध आलेख विभिन्न शोध पत्रिकाओं में प्रकाशित हैं। श्रीद्विवेदी ने कात्यायन श्रौतसूत्र की 'कात्यायनी' नामक हिन्दी व्याख्या तथा कात्यायन शुल्बसूत्र का सम्पादन करके वेदाध्यायियों का महान उपकार किया है। आप के पढ़ाये हुये अनेक छात्र विभिन्न विश्वविद्यालयों एवं महाविद्यालयों तथा प्राशासनिक क्षेत्र में सेवारत हैं। हिन्दी साहित्य सम्मेलन प्रयाग द्वारा आचार्य श्री द्विवेदी जी को महामहोपाध्याय की मानद उपाधि से अलंकृत किया गया है।

अभ्युदय प्रकाशन

C-2/3 विजय इन्क्लेव, पालम-डाबड़ी मार्ग

नई दिल्ली - 110045

₹ 1000/-

9 788195 290420